https://www.mpboardonline.com

**521**

# कक्षा 9 वीं परीक्षा, 2019–20

## [7205-A]

# SANSKRIT (General)

## संस्कृत सामान्यम्

[Total No. of Questions: 19] [Total No. of Printed Pages: 08]
[Time: 03 Hours] [Maximum Marks: 100]

*निर्देश –*

*(1) सर्वे प्रश्नाः करणीयाः।*
*(2) लेखनं सुवाच्यं स्पष्टं च भवतु।*
*(3) प्रश्नानां समक्षे निर्धारिताः अङ्काः प्रदत्ताः।*

https://www.mpboardonline.com

https://www.mpboardonline.com

प्र.1 अधोलिखितेषु उचितं विकल्पं चित्वा लिखत– (5X1=5)

(क) 'परोपकारः' इत्यस्मिन् कः सन्धिः?
(अ) यण् सन्धिः (ब) वृद्धि सन्धिः
(स) गुण सन्धिः (द) विसर्ग सन्धिः

(ख) व्यञ्जनसन्धेः उदाहरणम् अस्ति–
(अ) उच्चारणम् (ब) अत्याचारः
(स) विद्यालयः (द) महर्षिः

(ग) "नमः+ते" इत्यस्य सन्धिः स्यात्–
(अ) नमस्कार (ब) नमोऽते
(स) नमस्ते (द) नमोऽस्तु

(घ) गुणसन्धेः उदाहरणम् अस्ति–
(अ) कपीशः (ब) जगन्नाथः
(स) मनोहरः (द) नरेन्द्रः

(ङ) "अहम् अत्र अस्मि" इत्यस्मिन् अव्ययः अस्ति–
(अ) अत्र (ब) अहम्
(स) अस्मि (द) कोऽपि न



https://www.mpboardonline.com

https://www.mpboardonline.com

प्र.2 अधोलिखितेषु उचितं विकल्पं चित्वा लिखत– (5X1=5)

(क) तत्पुरुष–समासस्य उदाहरणम् अस्ति–
(अ) त्रिभुवनम् (ब) जलमग्नः
(स) दशाननः (द) घनश्यामः

(ख) 'महापुरुषः' इति कस्य समासस्य उदाहरणं स्यात्–
(अ) कर्मधारयः (ब) द्वन्द्वः
(स) बहुव्रीहिः (द) द्विगुः

(ग) 'पितरौ' इत्यस्य समासविग्रहं स्यात्–
(अ) माता च पिता (ब) पिता च पिता च
(स) च माता च पिता (द) माता च पिता च

(घ) उपसर्गयुक्तं पदं अस्ति–
(अ) लघुतमः (ब) गच्छति
(स) प्रहरति (द) एव

(ङ) 'सम्मानितः' इत्यस्मिन् पदे कः उपसर्गः?
(अ) स (ब) सन्
(स) सम् (द) नितः

प्र.3 उचितं विकल्पं चित्वा लिखत– (5X1=5)

(क) "पठिष्यति" इत्यस्मिन् पदे कः लकारः?
(अ) लट् (ब) लृट्
(स) लोट् (द) लङ्

(ख) "अनमत्" इत्यस्मिन् धातुः अस्ति–
(अ) अन् (ब) नम्
(स) नी (द) नमत्

(ग) 'हसामि' इत्यस्मिन् पदे कः पुरुषः?
(अ) प्रथमः पुरुषः (ब) मध्यमः पुरुषः
(स) उत्तमः पुरुषः (द) अन्यः पुरुषः

(घ) 'भवन्ति' इत्यस्मिन् पदे वचनम् अस्ति?
(अ) बहुवचनम् (ब) एकवचनम्
(स) द्विवचनम् (द) अमृतवचनम्

(ङ) "अलसस्य कुतः विद्या" वाक्येऽस्मिन् किम् अव्ययम्?
(अ) अलसस्य (ब) कुतः
(स) विद्या (द) कोऽपि न



https://www.mpboardonline.com
https://www.mpboardonline.com
https://www.mpboardonline.com

प्र.2 अधोलिखितेषु उचितं विकल्पं चित्वा लिखत– (5X1=5)

(क) तत्पुरुष–समासस्य उदाहरणम् अस्ति–
(अ) त्रिभुवनम् (ब) जलमग्नः
(स) दशाननः (द) घनश्यामः

(ख) 'महापुरुषः' इति कस्य समासस्य उदाहरणं स्यात्–
(अ) कर्मधारयः (ब) द्वन्द्वः
(स) बहुव्रीहिः (द) द्विगुः

(ग) 'पितरौ' इत्यस्य समासविग्रहं स्यात्–
(अ) माता च पिता (ब) पिता च पिता च
(स) च माता च पिता (द) माता च पिता च

(घ) उपसर्गयुक्तं पदं अस्ति–
(अ) लघुतमः (ब) गच्छति
(स) प्रहरति (द) एव

(ङ) 'सम्मानितः' इत्यस्मिन् पदे कः उपसर्गः?
(अ) स (ब) सन्
(स) सम् (द) नितः

प्र.3 उचितं विकल्पं चित्वा लिखत– (5X1=5)

(क) "पठिष्यति" इत्यस्मिन् पदे कः लकारः?
(अ) लट् (ब) लृट्
(स) लोट् (द) लङ्

(ख) "अनमत्" इत्यस्मिन् धातुः अस्ति–
(अ) अन् (ब) नम्
(स) नी (द) नमत्

(ग) 'हसामि' इत्यस्मिन् पदे कः पुरुषः?
(अ) प्रथमः पुरुषः (ब) मध्यमः पुरुषः
(स) उत्तमः पुरुषः (द) अन्यः पुरुषः

(घ) 'भवन्ति' इत्यस्मिन् पदे वचनम् अस्ति?
(अ) बहुवचनम् (ब) एकवचनम्
(स) द्विवचनम् (द) अमृतवचनम्

(ङ) "अलसस्य कुतः विद्या" वाक्येऽस्मिन् किम् अव्ययम्?
(अ) अलसस्य (ब) कुतः
(स) विद्या (द) कोऽपि न



https://www.mpboardonline.com
https://www.mpboardonline.com

प्र.4 अधोलिखितेषु उचितं विकल्पं चित्वा लिखत– (5×1=5)

(क) "श्रुत्वा" इत्यस्मिन् कः प्रत्ययः?

(अ) तुमुन्
(ब) श्रु
(स) क्त्वा
(द) क्तवतु

(ख) "वद् + शतृ = .................." भवति।

(अ) वदन्
(ब) वदतृ
(स) वदित्वा
(द) वदितुम्

(ग) 'टाप्' प्रत्ययस्य उदाहरणम् अस्ति–

(अ) कोकिला
(ब) क्रीडित्वा
(स) नारी
(द) बुद्धिमान्

(घ) 'मतिमान्' इत्यस्मिन् पदे कः प्रत्ययः?

(अ) तरप्
(ब) मान्
(स) मतुप्
(द) तमप्

(ङ) ...................व्यवहारे च त्यक्तलज्जः सुखी भवेत्।

(अ) गृहे
(ब) आहारे
(स) दाने
(द) विवाहोत्सवे

प्र.5 प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयत– (5×1=5)

(क) पाषाणतले......................संरक्षिता आसीत्। (रोटिका / रोटिका द्वयम्)

(ख) इयम् भूमिः......................................अस्ति। (कर्मभूमिः / भोगभूमिः)

(ग) सा.........................................या विमुक्तये। (धनम् / विद्या)

(घ) तस्य अहं..................इति नाम करिष्यामि। (सोमशर्मा / देवशर्मा)

(ङ) गृधकूटनाम्नि..................पर्कटीवृक्षः अस्ति। (पर्वते / गृहे)



https://www.mpboardonline.com

https://www.mpboardonline.com

प्र.6 अधोलिखितेषु प्रश्नेषु कानिचित् त्रीणि उत्तराणि एकवाक्येन संस्कृते लिखत– (3×2=6)

(i) घटः कैः सम्पूरितः?

(ii) मन्त्रमूलाः के?

(iii) कः महान् पितृभक्तः आसीत्?

(iv) देहस्य सारं किम्?

(v) माता इव का रक्षति?

प्र.7 अधोलिखितेषु द्वयोः शब्दयोः रूपाणि त्रिषु वचनेषु निर्देशानुसारं लिखत– (2)

(i) राम – पञ्चमी विभक्तिः

(ii) हरि – तृतीया विभक्तिः

(iii) किम् (पुल्लिङ्ग) – द्वितीया विभक्तिः

प्र.8 मम अथवा रामस्य विभक्तिः वचनञ्च लिखत। (2)

प्र.9 अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृते लिखत– (2×5=10)

(क) श्रवणस्य मातुः नाम भाग्यवती पितुः नाम शान्तनुः च आस्ताम्। श्रवणः मातरं पितरं च विहङ्गिकायाम् उपावेश्य स्वस्कन्धे तां धृत्वा तीर्थाटनम् अकारयत्। सः वनात् वनान्तरे भ्रमन् तमसानद्याः तीरं समागतः। संयोगात् अयोध्यायाः नृपः दशरथः आखेटं कुर्वन् सैनिकैः वियुक्तः मार्गात् भ्रष्टः तत्रैव वनमागतवान्।

(i) श्रवणस्य मातुः नाम किम्?

(ii) अयोध्यायाः नृपः कः?

(iii) शान्तनुः कस्य पितुः?

(iv) श्रवणः कस्याः तीरं समागतः?

(v) 'वनात्' इत्यस्मिन् का विभक्तिः?

https://www.mpboardonline.com
https://www.mpboardonline.com



https://www.mpboardonline.com

https://www.mpboardonline.com

(ख) एकदा राजकुमारः चम्पा च नदीतटे क्रीडतः आस्ताम्। तदैव राजकुमारः क्षुधापीडितः अभवत्। सः रोटिकां याचनाम: रोदितवान्। सः न जानाति स्म यत् रोटिकायाः ग्रासमेकमपि नास्ति। चम्पा तं कथां श्रावयित्वा विनोदयामास। राजकुमारः बुभुक्षितः एव सुप्तवान्।

(i) कः क्षुधापीडितः अभवत्?

(ii) चम्पा तं कथं विनोदयामास?

(iii) राजकुमारः चम्पा च कुत्र क्रीडतः आस्ताम्?

(iv) कः बुभुक्षितः एव सुप्तवान्?

(v) 'श्रावयित्वा' इत्यस्मिन् कः प्रत्ययः?

(ग) ततः कश्चिद् विप्रः मम गृहम् आगत्य रूपाढ्यां कन्यां मह्यं दास्यति। तत्सकाशात् पुत्रो मे भविष्यति। तस्य अहं "सोमशर्मा" इति नाम करिष्यामि। ततः तस्मिञ्जानुचलन–योग्ये सञ्जाते अहं पुस्तकं गृहीत्वा अश्वशालायाः पृष्ठदेशे उपविष्टस्तदवधारयिष्यामि।

(i) कः रूपाढ्यां कन्यां मह्यं दास्यति?

(ii) तत्सकाशात् कः भविष्यति?

(iii) सः कुत्र उपविष्टः पुस्तकं अवधारयिष्यति?

(iv) सः पुत्रस्य नाम किम् करिष्यति?

(v) 'पृष्ठदेशे' इत्यस्मिन् का विभक्तिः?

प्र.10 अधोलिखितेषु पद्यांश–द्वयस्य प्रश्नानां उत्तराणि संस्कृत–भाषायां लिखत– (2×5=10)

(क) अहं मुनीनां वचनं श्रृणोमि,
गवाशनानां स श्रृणोति वाक्यम्।
न चास्य दोषो न च मद्गुणो वा
संसर्गजाः दोषगुणाः भवन्ति।।

(i) अहं केषां वचनं श्रृणोमि?

(ii) सः केषां वाक्यं श्रृणोति?

(iii) संसर्गजाः के भवन्ति?

(iv) 'श्रृणोति' इत्यस्मिन् कः लकारः?

(v) 'वचनं' इत्यस्य विभित्तं लिखत।


https://www.mpboardonline.com
https://www.mpboardonline.com
https://www.mpboardonline.com

https://www.mpboardonline.com

(ख) नास्ति क्षुधासमं दुःखं, नास्ति रोगः क्षुधा समः।
नास्त्याहारसमं सौख्यं, नास्ति क्रोधसमो रिपुः।।

(i) क्षुधासमं किं नास्ति?

(ii) आहारसमं किं नास्ति?

(iii) क्रोधसमः कः नास्ति?

(iv) क्षुधासमः कः नास्ति?

(v) 'रिपुः' शब्दस्य विलोमार्थी–शब्दं लिखत।

(ग) षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता।
निद्रा तन्द्रा भयं क्रोधं आलस्यं दीर्घसूत्रता।।

(i) षड्दोषाः केन हातव्याः?

(ii) किम् इच्छता षड्दोषाः हातव्याः?

(iii) षड्दोषानां नामानि लिखत।

(iv) षड्दोषेषु तृतीयः दोषः कः?

(v) 'पुरुषेण' इत्यस्य विभक्तिं लिखत।

प्र.11 अधोलिखितेषु चतुर्णां पदानां उचितं युग्म–मेलनं कुरुत– (4X1=4)

| (क) | (ख) |
| --- | --- |
| (अ) कौशल्यानन्दवर्धनः | (i) संसर्गजाः |
| (ब) दोषगुणाः | (ii) रामः |
| (स) बाणसन्धाता | (iii) बालस्य माता |
| (द) शकुन्तला | (iv) अहिंसाव्रती |

प्र.12 सत्यवाक्यानां समक्षं "आम्" असत्यवाक्यानां समक्षं "न" इति लिखत। (4X1=4)

(क) पिप्पलः वरप्राप्त्या निरभिमानी जातः। ☐

(ख) अतिथि महाराणागृहात् अनश्नन् गतवान्। ☐

(ग) सज्जनानां संगति करणीया। ☐

(घ) कलशः सक्तुभिः सम्पूरितः। ☐



https://www.mpboardonline.com

https://www.mpboardonline.com

https://www.mpboardonline.com

https://www.mpboardonline.com

प्र.13 अधोलिखितेषु चतुर्णां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकपदेन लिखत– (4×1=4)

(i) विप्रः पुत्रस्य नाम् किम् चिन्तितवान्?

(ii) दैवेन देयमिति के वदन्ति?

(iii) ऋषि जनेन बालस्य नामं किम् कृतम्?

(iv) श्रवणः जलार्थं कुत्र गतः?

(v) जीवने किम् आवश्यकम्?

(vi) सद्भिः सङ्गः केन भवति?

प्र.14 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्य–पुस्तकस्य कण्ठस्थीकृतं श्लोकद्वयं लिखत। (4)

प्र.15 स्वस्य प्राचार्यस्य कृते पञ्चदिवसानां अवकाश–प्रार्थना–पत्रं संस्कृते लिखत। (4)

अथवा

स्वमित्रं प्रति एकं पत्रं लिखत।

प्र.16 अधोलिखितेषु "पञ्च" अशुद्धवाक्यानां शुद्धिः करणीया– (5×1=5)

(i) ईश्वरं नमः।

(ii) ग्रामस्य अभितः पर्वताः सन्ति।

(iii) बालकः अश्वं पतति।

(iv) आशुतोषः मित्रं सह गच्छति।

(v) अहं पत्रं लिखति।

(vi) माता बालकं दुग्धं ददाति।

प्र.17 अधोलिखित–वाक्यानां कथानुसारं क्रम–संयोजनं कुरुत– (5×1=5)

(क) कश्चित् एकः महान् तपस्वी ऋषिः आसीत्।

(ख) शुकयोः भिन्न व्यवहारं दृष्ट्वा ऋषिः आश्चर्यसागरे निमग्नः अभवत्।

(ग) संसर्गजाः दोषगुणाः भवन्ति।

(घ) सः शुकं ऋषिं दृष्ट्वा "मारयतु कुट्टयतु" इति वारं वारम् उच्चैः उक्तवान्।

(ङ) सः ऋषिं दृष्ट्वा "सीताराम–सीताराम" इति उक्तवान्।



https://www.mpboardonline.com

https://www.mpboardonline.com

https://www.mpboardonline.com

प्र.18 अधोलिखितम् अपठितगद्यांशं सम्यक् पठित्वा प्रश्नानां उत्तराणि संस्कृत–भाषायां लिखत– (5×1=5)

संसारे अनेकेषां दुःखानां मूलकारणम् अज्ञानम् एव। अज्ञानात् एव समाजे नानाविकाराणां जन्म भवति। हिंसाभ्रष्टाचारादयः ये उपद्रवाः अस्मान् पीड्यन्ति, तेषां मूलम् अशिक्षा एव वर्तते। वयं शिक्षायाः प्रकाशेन अज्ञानस्य अन्धकारं हर्तुं सज्जाः भवेम।

(क) अस्य गद्यांशस्य शीर्षकं लिखत।

(ख) दुःखानां मूलकारणं किम्?

(ग) कस्मात् समाजे नानाविकाराणां जन्म भवति?

(घ) अस्मान् के उपद्रवाः पीड्यन्ति?

(ङ) अज्ञानस्य अन्धकारं हर्तुं वयं किं कुर्याम?

प्र.19 अधोलिखितेषु एकं विषयं स्वीकृत्य संस्कृतभाषायां शतशब्देषु निबन्धं लिखत– (10)

(i) विद्या

(ii) पुस्तकम्

(iii) शिक्षकः

(iv) धेनुः

-----------------------------------

https://www.mpboardonline.com
https://www.mpboardonline.com

**https://www.mpboardonline.com**
**Whatsapp @ 9300930012**
**Send your old paper & get 10/-**
**अपने पुराने पेपर्स भेजे और 10 रुपये पायें,**
**Paytm or Google Pay से**